दिनाङ्क :- 21.06.2025

प्रात: - 06:55

**<u>अन्ताराष्ट्रिय-योग- दिवस: प्रधानमंत्री</u>**

**अद्य कृत्स्ने हि विश्वे अन्ताराष्ट्रिय-योग- दिवस: आचर्यते। यत्र सम्पूर्ण देशे शततमेषु प्रतिष्ठित पर्यटनाधारितेषु गन्तव्यस्थलेषु, पञ्चाशदधिकेषु सांस्कृतिक-स्थलेषु च योग-सत्राणां आयोजनं क्रियते। एते अद्यतनीयाः निर्धारिताः कार्यक्रमाःसन्ति, प्रामुख्येन आयुष्-मन्त्रालयेन विशाखापत्तन इत्यत्र प्रधानमन्त्रिणः उपस्थितौ एकः विशेषयोगोत्सवः समायोज्यते। योगदिवसावसरे,, देहल्या: पुरानी किला , कर्णाटकस्य गोल-गुम्बदः, ओडिशा-राज्यस्य कर्णक्-सूर्यमन्दिरं, राजस्थानस्य चित्तोर्गढ्-दुर्गः, महाराष्ट्रस्य एलिफेंटा केव्स-गुहा- इत्यादिषु प्रतिष्ठितेषु ऐतिहासिक-स्थलेषु योगस्य अभ्यासं कर्तुं सहस्रशः प्रतिभागिनः समागच्छन्ति । अन्ताराष्ट्रिय-योग दिवसस्य अवसरे प्रधानमन्त्री नरेन्द्रमोदी विशाखापट्ने सामान्य-योग-प्रोटोकाल्-सत्रे भागं गृह्णाति, यस्मिन् योग-सङ्गम्-उपक्रमस्य अन्तर्गतं सम्पूर्ण देशे दश लक्ष्यतोप्यधिकेषु स्थलेषु त्रि-लक्षात् अधिकाः प्रतिभागिनः भागं गृह्णन्ति।। अनेके केन्द्रीयमन्त्रिणः, अन्ये च प्रमुखाः गणमान्य जना: सम्पूर्ण देशे विभिन्नेषु स्थानेषु उत्सवेषु भागं वहन्ति । अस्य वर्षस्य विषयो वर्तते -एका-पृथिवी, एकं-स्वास्थ्यमिति ।**

**<u>राजनाथ सिंह:- आपरेशन् सिन्दूर्</u>**

**रक्षामन्त्री राजनाथ सिंह: अवोचत् यत् आपरेशन् सिन्दूर् इत्यनेन भयोत्पादकेभ्यः तेषां आश्रयदातृभ्यः च प्रबलः सन्देशः प्रेषितः यत् नवभारतम् इदानीम् इतोऽपि भयोत्पादनेन पीडितः न भविष्यति, अपितु शक्त्या रणनीत्या च प्रतिक्रियां करिष्यति इति। जम्मू-कश्मीर्-राज्यस्य उधम्पूर्-नगरे उत्तर-कमाण्ड्-मध्ये ह्यः सैनिकैः सह वार्तालापं कुर्वन् रक्षामन्त्री एतत् अवोचत्।**

**रक्षामन्त्री सशस्त्रसेनायाः साहसस्य प्रशंसाम् अकरोत्। भयोत्पादनं प्रति भारतस्य नीतिपरिवर्तनं अस्य अद्वितीयशौर्यस्य समर्पणस्य च परिणामः अस्ति इति सः अब्रवीत्।**

**<u>इरान्-इस्रेल्-सङ्घर्षः</u>**

**पश्चिम-एशियायाः स्थितिं यथाशीघ्रतया सामान्यीकर्तुम् ह्य: ईरान्-देशस्य विदेशमन्त्रिणः अब्बास् अराघ्ची इत्यस्य जिनेवा-नगरे जर्मनी, फ़्रान्स्, यू. के. देशानां विदेशमन्त्रिभिः सह मेलनस्य कार्यक्रमः अस्ति। प्रसारमाध्यमानां सूचनानुसारं, ईरानस्य विदेशमन्त्रिणा सह परमाणु-संवादात् प्राक् त्रयाणां यूरोपीय-राष्ट्राणां मन्त्रिस्तरीय-प्रतिनिधिदलस्य प्रथमतया जिनेवा-नगरे जर्मनी-देशस्य स्थायी-मिशन् इति मध्ये यूरोपीय-सङ्घस्य शीर्ष-कूटनीतिज्ञेन काजा कल्लस् इत्यनेन सह मेलनं भविष्यति। अग्रिमे सप्ताहे हेग् इति नगरे नेटो इति नेतॄणां शिखरसम्मेलनात् पूर्वम् कूटनीतीप्रयासः महत्त्वपूर्णः उपायः इत्यपि मन्यते, यत्र क्षेत्रे सुरक्षा कार्यसूच्यां शीर्षस्थाने भविष्यति।**

**<u>भारतीय- ऋतुविज्ञान-विभाग:</u>**

**भारतीय-ऋतुविज्ञान-विभागेन अस्य मासस्य पञ्चविंशति- दिनाङ्कपर्यन्तं वायव्य-मध्यभारतयोः केषुचित् भागेषु प्रचण्डतोप्यधिक वर्षायाः पूर्वानुमानं कृतम्। दिल्ली, हरियाणा, चण्डीगढ, उत्तराखण्ड, उत्तरप्रदेश, बिहार, राजस्थान, गुजरात, मध्यप्रदेश, ओडिशा, कोङ्कण, गोवा, पूर्वोत्तरभारतस्य केषुचित् भागेषु च पृथक्-पृथक् स्थानेषु प्रचण्डवृष्टिः भविष्यति इति ऋतुविज्ञानविभागेन पूर्वानुमितम्।**

**<u>नीरज चोपडा</u>**

**भारतस्य जेवलिन क्रीडक: नीरज चोपडा गतरात्रौ स्टेड् सेवास्टियन् चार्लेटी इत्यत्र पंचविशत्युत्तर द्विसहस्त्रतमवर्षस्य पेरिस डायमण्ड लीग इत्यस्यां प्रतिस्पर्धायां विजयं अवाप्नोत्।**